**01.** परा-अयते भवति -

(1) परायते (2) पलायते

(3) पारायते (4) पर्यावर्तते

**02.** मीमांसादर्शनस्य प्रणेताऽस्ति -

(1) सायणाचार्यः (2) जैमिनिः

(3) माधवाचार्यः (4) गौतमः

**03.** पुराणानां कर्तास्ति -

(1) व्यासः (2) सूतः

(3) शुकदेवः (4) शौनकः

**04.** योगसूत्रस्य प्रथमं सूत्रं वर्तते -

(1) अथातो योगजिज्ञासा (2) अथातो योगः

(3) अथ योगं व्याख्यास्यामः (4) अथयोगानुशासनम्

**05.** गोपथब्राह्मणं संबद्धं वर्तते-

(1) ऋग्वेदेन (2) यजुर्वेदेन

(3) सामवेदेन (4) अथर्ववेदेन

**06.** सांख्यमतानुसारं पुरुषो वर्तते -

(1) त्रिगुणात्मक: (2) चेतन:

(3) प्रधान: (4) अव्यक्त:

**07.** विवाहस्य भेदा भवन्ति -

(1) 4 (2) 6 (3) 8 (4) 10

**08.** आगमशास्त्रमतेन जगत:स्वरूपं विद्यते -

(1) विवर्त: (2) सत्यम्

(3) मिथ्या (4) शून्यम्

**09.** स्याद्वाद: सिद्धान्तोस्ति -

(1) आगमशास्त्रस्य (2) न्यायशास्त्रस्य

(3) जैनशास्त्रस्य (4) सांख्यशास्त्रस्य

**10.** मीमांसा पदस्य लक्ष्यार्थ: -

(1) जिज्ञासा (2) न्याय:

(3) विचार: (4) ऊहनम्

**11.** मम्मटोक्ते काव्यलक्षणे 'अदोषौ' इत्यत्र समासोऽस्ति-

(1) अव्ययीभाव: (2) बहुव्रीहि: (3) द्विगु: (4) कर्मधारय:

12. रसगङ्गाधरे काव्यलक्षणमस्ति-

(1) शब्दप्रधानम् (2) अर्थप्रधानम् (3) शब्दार्थप्रधानम् (4) भावप्रधानम्

13. 'प्रतिभैव काव्यकारणम्' इति कः मनुते ?

(1) विश्वनाथः (2) जगन्नाथः (3) आनन्दवर्धनः (4) मम्मटः

14. मीमांसानये सङ्केतग्रहो भवति-

(1) [illegible] (2) जातौ

(3) व्यक्तौ (4) क्रियायाम्

15. अन्वितानां पदानामभिधया बोधनं कस्य मते भवति ?

(1) प्रभाकरमिश्रस्य (2) मुरारिमिश्रस्य (3) कुमारिलभट्टस्य (4) मम्मटाचार्यस्य

16. 'त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति' इत्यादौ ध्वनिप्रकारोऽस्ति-

(1) अर्थान्तरसङ्क्रमितवाच्यध्वनिः (2) अत्यन्ततिरस्कृतवाच्यध्वनिः

(3) विवक्षितान्यपरवाच्यध्वनिः (4) काक्वाक्षिप्तगुणीभूतव्यङ्ग्यम्

17. आनन्दवर्धनोक्तध्वनिकारिकायां दशदोषाः केनोद्भाविताः ?

(1) महिमभट्टेन (2) उलूकभट्टेन (3) मम्मटभट्टेन (4) कौण्डभट्टेन

**18.** रसस्य संलक्ष्यक्रमव्यङ्ग्यत्वं स्वीकरोति-

(1) विश्वनाथ: (2) जगन्नाथ: (3) आनन्दवर्धन: (4) मम्मट:

**19.** रसाभासस्याङ्गतायां कोऽलङ्कार: ?

(1) रसवत् (2) प्रेय: (3) ऊर्जस्वि (4) समाहित:

**20.** पदस्याप्रसिद्धेऽर्थे प्रयोगे दोषो भवति-

(1) निहतार्थ: (2) अवाचक: (3) अनुचितार्थ: (4) नेयार्थ:

**21.** 'व्यक्तिविवेक:' इत्यत्र व्यक्तिशब्दस्यार्थोऽस्ति-

(1) व्यञ्जना (2) अभिव्यक्ति: (3) मनुष्य: (4) शक्ति:

**22.** 'व्यक्तिविवेके अनुमानेऽन्तर्भाव: कृत:-

(1) उपमाया: (2) ध्वने: (3) प्रत्यभिज्ञाया: (4) काव्यस्य

**23.** संशयमूलक: कोऽलङ्कार: ?

(1) उपमा (2) उत्प्रेक्षा (3) तुल्ययोगिता (4) विभावना

**24.** विशेषस्य विशेषेण समर्थने कोऽलङ्कार: ?

(1) निदर्शना (2) अर्थान्तरन्यास: (3) तुल्ययोगिता (4) दृष्टान्त:

25. उपायापायाशङ्काभ्यां युक्ता कार्यावस्था भवति-

(1) आरम्भः (2) यत्नः (3) प्राप्त्याशा (4) नियताप्तिः

26. बीभत्सरसोपयोगिनी वृत्तिः का ?

(1) सात्त्वती (2) आरभटी (3) कैशिकी (4) भारती

27. 'स्वप्नवासवदत्तम्' इति नामकरणं कमाङ्कमाश्रित्य जातम् ?

(1) चतुर्थम् (2) पञ्चम् (3) द्वितीयम् (4) तृतीयम्

28. 'द्यूतं हि नाम पुरुषस्यासिंहासनं राज्यम्' इत्युक्तिः कुत्रत्या ?

(1) उत्तररामचरितस्य (2) मुद्राराक्षसस्य

(3) मृच्छकटिकस्य (4) अभिज्ञानशाकुन्तलस्य

29. मृच्छकटिके प्रवहणविपर्ययो नामाङ्कोऽस्ति-

(1) चतुर्थः (2) पञ्चनः (3) षष्ठः (4) सप्तमः

30. 'दीपशिखेति' विरुदने कः सभाजितोऽस्ति ?

(1) तुलसीदासः (2) कालिदासः (3) कुमारदासः (4) हरिदासः

31. निम्नांकितेषु भवभूतेः रचना नास्ति-

(1) उत्तररामचरितम् (2) मालतीमाधवम् (3) महावीरचरितम् (4) उदात्तराघवम्

32. 'जानकीहरणम्' महाकाव्यस्य कर्त्ता कः ?

(1) रत्नाकरः (2) चण्डीदासः (3) कुमारदासः (4) विश्वेश्वरपण्डितः

33. नैषधीयचरिते कति सर्गाः सन्ति ?

(1) एकोनविंशतिः (2) विंशतिः (3) एकविंशतिः (4) द्वाविंशतिः

34. कादम्बरी अस्ति-

(1) कथा (2) आख्यायिका (3) बृहत्कथा (4) उपन्यासः

35. 'मदालसाचम्पूः'कस्य रचनास्ति ?

(1) सोमदेवसूरेः (2) त्रिविक्रमभट्टस्य (3) कविकर्णपूरस्य (4) अनन्तभट्टस्य

36. स्तुतिकुसुमाञ्जलेः प्रणेतास्ति-

(1) जगद्धरभट्टः (2) धोयीकविः (3) शङ्कराचार्यः (4) रामानुजाचार्यः

37. क्षेमेन्द्रः कर्त्तास्ति-

(1) बृहत्कथायाः (2) कथासरित्सागरस्य

(3) बृहत्कथामञ्जर्याः (4) बृहत्कथाश्लोकसङ्ग्रहस्य

38. 'साकेतसौरभम्' नाम महाकाव्यं विरचितमस्ति-

(1) राधावल्लभत्रिपाठिना (2) रेवाप्रसादद्विवेदिना

(3) हरिरामाचार्येण (4) भास्कराचार्यत्रिपाठिना

39. पञ्चतन्त्रे नास्ति-

(1) अपरीक्षितकारकम् (2) मित्रसम्प्राप्तिः

(3) काकोलूकीयम् (4) अर्थसम्प्राप्तिः

40. महाभारतस्य कस्मिन् पर्वणि श्रीमद्भगवद्गीतास्ति ?

(1) शान्तिपर्वणि (2) भीष्मपर्वणि (3) वनपर्वणि (4) द्रोपर्वणि

## *Short Answer Questions*

## *लघु उत्तरीय प्रश्न*

**Note:** Attempt any **five** questions. Write answer in **150-200** words. Each question carries **16** marks. Answer each question on separate page, after writing Question Number.

किन्हीं **पाँच** प्रश्नों के उत्तर दीजिए। प्रत्येक का उत्तर **150-200** शब्दों में दीजिए। प्रत्येक प्रश्न **16** अंकों का है। प्रत्येक प्रश्न का उत्तर अलग पृष्ठ पर प्रश्न संख्या लिखकर शुरु करें।

**01.** 'तात्पर्यार्थो विशेषवपुरपदार्थोऽपि' इत्यस्याशय: स्पष्टीक्रियताम् ।

**02.** वाच्यव्यङ्ग्विभेद: संक्षेपेण प्रतिपादनीय: ।

**03.** व्यङ्ग्यार्थस्य व्यञ्जकत्वं सोदाहरणं प्रतिपाद्यताम् ।

**04.** मम्मटोक्त: रसनिष्पत्तिप्रकार: निर्दिश्यताम् ।

**05.** प्रसज्यप्रतिषेधविषये विवेचनं विधीयताम् ।

**06.** काव्यप्रकाशोक्तं लक्षणालक्षणं व्याख्यात ।

**07.** अभिज्ञानशाकुन्तले दुष्यन्तस्य धीरोदात्तत्वं परीक्षणीयम् ।

**08.** 'घण्टा माघ:' इत्युपाधौ कारणीभूतं पद्यं विलिख्य सुष्ठु व्याख्यात ।

09. 'एको रसः करुण एव' इति सूक्तिं विशदयत ।

10. नैषधीयचरितस्य हंसविलापवर्णनं स्वसंकृतगिरा लिखत ।